| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| चण्डालस्य दृतीरजलादिपानम् । | त्रिरात्रमुपोष्य पञ्चगव्यपानम् । एतत् ज्ञानतः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | अज्ञानात् द्वादशसाध्यसान्तपनम् । | ० | १ कार्षापणः । | यथाशक्ति । |
| अन्त्यजखानितकूपादिजलपानम् । | उपवासपूर्व्वकपञ्चगव्यपानम् । एतदज्ञानतः। | ० | ॥० पणाः । | यथाशक्ति । |
| | ज्ञानात् द्वैगुण्यम् । | ० | १ कार्षापणः । | यथाशक्ति । |
| अन्त्यजभाण्डस्थजलादिपानम् । | ब्राह्मणस्य द्वादशसाध्यं ब्रह्मकूर्च्चव्रतम् । एतत् अज्ञानतः । ज्ञानतो द्वैगुण्यम् । | ० | १ कार्षापणः । | यथाशक्ति । |
| | शूद्रस्य गोपवासः पञ्चगव्यपानमात्रम् । ब्रह्मकूर्च्चं यथा । "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः । पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः ॥" पञ्चगव्यं यथा । "गोशकृत् द्विगुणं मूत्रं सर्पिर्विद्याच्चतुर्गुणम् । क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि ॥" अथवा । "गोमूत्रमाषकास्त्वष्टौ गोमयस्य तु षोडश । क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्त्तिताः ॥ गोमूत्रवद्घृतस्योक्तास्तदर्द्धेन कुशोदकम् ॥" | ० | ॥० पणाः । | यथाशक्ति । |
| शूद्रोदकपानम् । | उपोष्य बिल्वपद्मपलाशकुशानामुदकमात्रपानम् । एतद्द्वादशसाध्यं ज्ञानतः सकृत्पाने । अज्ञानादर्द्धम् । नवभाण्डोदकपाने प्रायश्चित्ताभावः । | ० | १ कार्षापणः । | यथाशक्ति । |
| पीतशेषपानीयपानम् । केवलवामहस्तेन जलपानञ्च । | त्रिरात्रोपवासः । एतच्च ज्ञानतः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | अज्ञानतोऽर्द्धम् । | ० | ॥॥० पणाः । | यथाशक्ति । |
| | एतत् प्रायश्चित्तं ग्रासशेषाशनादिष्वपि ज्ञेयम् । | | | |
| | शूद्रपीतशेषजलपाने तु ब्राह्मणस्य चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| प्रपादिजलपानम् । आदिना कूपजलाहरणार्थघटस्थजलं द्रोणीजलं खड्गादिकोषस्थजलञ्च । | सचेलस्नानम् । उपवासश्च । एतत् सकृदज्ञानतः । आपदि दोषाभावः । | ० | ॥० पणाः । | यथाशक्ति । |
| विण्मूत्रसंसृष्टकूपजलपानम् । | त्रिरात्रोपवासः । एतदज्ञानतः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | ज्ञानतः सान्तपनम् । | २ धेनू । | ६ कार्षापणाः । | तथा । |
| विण्मूत्रसंसृष्टकुम्भस्थजलपानम् । | अज्ञानतः सान्तपनम् । | २ धेनू । | ६ कार्षापणाः । | यथाशक्ति । |
| | ज्ञानतो द्वैगुण्यम् । | | | |
| शवदूषितजलपानम् । एतत् मानुषेतराभक्ष्यपञ्चनखशवदूषितकूपजलपानपरम् । | ब्राह्मणस्य त्रिरात्रोपवासः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | क्षत्रियस्य द्व्यहोपवासः । | ० | १ कार्षापणः । | यथाशक्ति । |
| | वैश्यस्यैकाहोपवासः । | ० | ॥० पणाः । | यथाशक्ति । |
| | शूद्रस्य नक्तम् । | ० | ।० पणाः । | यथाशक्ति । |
| | सर्व्वेषां व्रतान्ते पञ्चगव्यपानम् । एतत् ज्ञानतः । अज्ञानतोऽर्द्धम् । एतदक्लिन्नशवे । | | | |
| | ज्ञानतः क्लिन्ने षड्रात्रोपवासः । एतत् सर्व्वं मानुषशवेतरपरम् । मानुषशवे द्विगुणम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | कामाभ्यासे पराकः । | ५ धेनवः । | १५ कार्षापणाः । | यथाशक्ति । |
| | अत्यन्ताभ्यासे चान्द्रायणम् । | ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |